श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीकृष्णकवि विरचितम्

# ॥ श्रीरघुवीरसुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरघुवीरसुप्रभातम् ॥

परिणतिपरिशंसी मन्दमन्दं निशाया
मृदुमधुरनिनादो जृम्भतेऽयं मृदङ्गात्।
करतलपरिमृष्टाद् बन्दिनामागतानां
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ १ ॥

मुहुरविकलगीतैर्मोहयन्निन्द्रियौघं
श्रुतिपुटविवराभ्यां मन्दमतः प्रविश्य।
अयमपहरति द्राङ्मानसं वेणुनादो
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ २ ॥

उदयति निशि यस्मिन् सद्गणो धिक्कृतोऽभूत्
स तु पतनमुपैष्यत्युन्नतिं धिग् धिगिन्दोः।
प्रभवति हि विभूत्यै सद्गणस्योन्नतिस्ते
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ३ ॥

अयमुदयति गूढः किञ्चिदुच्चैः सरिद्भिः
श्रयति सपदि भास्वानंशुजालैः परीतः।
हरिहरिदसिताक्ष्याः कङ्कताभां कराब्जे
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ४ ॥

दशशतकरजालं द्राक् प्रसार्यांशुमालि-
न्यमरदिगसिताक्ष्याश्लेषणायोन्मुखेऽस्मिन्।
कलमिह रचयन्ते गीतमेता विहङ्ग्यो
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ५ ॥

विकचजलजगन्धानाहरन् मन्दवात-
श्चिरमयमवगाह्य स्रोतसि ह्रादिनीनाम्।

शमयति तव देव्याः स्वेदबिन्दून् मुखाब्जे
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ६ ॥

जनकनृपतिकन्या पूर्वमेव प्रबुद्धा
कथमपि विरचय्याश्लेषभेदं तवैषा।
रचयति ननु दूरे क्लेशमावीजनात् ते
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ७ ॥

तव चरणसरोजद्वन्द्वसंवाहनेन
ह्ययमपि गमयित्वा शर्वरीं निर्निमेषम्।
अरुणनयनकोणः प्राञ्जलिर्वायुसूनू
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ८ ॥

कमपि कुलिशपाणेरायुधेनाप्यभेद्यं
रचयसि यदि सेतुं देव संसारसिन्धोः।
तरति सुखमिदानीं सर्व एवात्र लोके
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ ९ ॥

॥ इति श्रीरघुवीरसुप्रभातम् समाप्तम् ॥